69122
kan
795
00000795

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

धनञ्जयविजयः

श्रीकाञ्चनाचार्य्यैरचितः ।

गवर्णमेण्टसंस्कृतपाठशालाध्यापक

श्रीतारानाथतर्कवाचस्पतिना

संस्कृतः ।

DHANANJAYAVIJAYA

BY

KANCHANA ACHARYA.

EDITED WITH NOTES

TARANATHA TARKAVACHASPATI,

Professor of Grammar Govt. Sanskrit College.

Calcutta

PRINTED AT THE VALMIKI PRESS.

18 1.

00000795

धनञ्जयविजयः ।

व्यायोगः ।

नान्दी ।

हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु वः ।
हेमाद्रिकलसा यत्र धात्री च्छत्रश्रियं दधौ [१] ॥

स्मरामि परमेशानं सच्चिदानन्दविग्रहम्
चिन्तितो यो हृदा भक्त्या संसारार्णवतारकः ।
जिज्ञासूनां प्रबोधाय श्रीतातार्यप्रभृतीनां
विघ्नमाणि पदानीह आख्यायन्ते प्रयत्नतः ॥

[१] लीलावराहस्य स्वेच्छामात्रेण धृतवराहमूर्त्तेर्हरेः । दंष्ट्रैव दण्डः । यद्वा दंष्ट्रारूपदण्डे वर्त्तमानेति शेषः । हेमाद्रिः स्वर्णमयगिरिः सुमेरुः स कलस इव यस्याः सा धात्री धरा छत्रश्रियं छत्रशोभां, दण्डोपरि धृतत्वेन, स्वर्णकलसाकारमण्डनविशेषवत्त्वेन च धरायाश्छत्रशोभायत्त्वम् तथा च सुमेरुसहिताया धरायाः अपि स्वाकारैकदण्डमात्रेण धारणात् हरेः प्रभूत्कर्षो व्यज्यते ।

अपिच ।

तद्दः प्रमार्ष्टुं विपदः प्रणतार्त्तिहन्त्र्या
न्यस्तं पदं महिषमूर्द्धनि चण्डिकायाः ।
वैरी यदीयनखरांशुपरीतशृङ्गः [१]
शक्रायुधाङ्कितनवाम्बुधरप्रभोऽभूत् ॥

अपिच ।

तद्दः सारस्वतं चक्षुः ससुन्मीलतु सर्वदा ।
यत्र सिद्धाञ्जनयन्ते [२] गुरुपादाब्जरेणवः ॥

---

[१] वैरी महिषः । यदीयं यस्य पदस्य सम्बन्धि, नखोऽस्यस्य कृञ्चादित्वात् रः नखरमङ्कुशं "किंखिदूर्द्धं तथा चाममङ्कुशं महिषो-परीति तज्ज्ञानवाक्ये महिषमूर्द्धनि अङ्कुशार्पणस्यैव प्रतीतेः तस्यांशुभि-श्चय च नखरः प्रोतः भक्तानां तापनिवारकत्वात् योऽंशुरित्यपि ध्वन्यते, परीतशृङ्गः अनेनाङ्कुशस्य आरुण्यं गम्यते अरुणकिरण-संसर्गादेव मेघे शक्रायुधस्योद्भवात् । एतद्विघ्नघातेन देवानामपि दुर्जयमहिषासुरस्याङ्कुशमात्रेणाक्रान्त्या हननात्तस्या विपन्निवारण-मभिप्रेत्यैतदुक्तमिति रुचितम् । महिषस्य स्वतः कृष्णत्वात् मेघसादृश्यम्, शृङ्गस्य धनुराकृतित्वात् अरुणाङ्कुशकिरणसम्पर्काच्च शक्रायुध-सादृश्यम् ।

[२] सरस्वत्या इदं सारस्वतीप्रसादलब्धं चक्षुः शास्त्रज्ञानम् । सिद्धाञ्जनं योगशास्त्रप्रसिद्धं अञ्जनविशेषः यत्सेवनात् भूतभविष्य-द्वर्त्तमानं लोकत्रयगतञ्च वस्तु प्रत्यक्षं भवति, तदिवाचरन्तीति अङ्

[नाट्यन्ते सूत्रधारः [१] ॥]

[सूत्र। समन्तादवलोक्य।] अहो रमणीयता प्रभातस्य! तथाहि।

दाराणां सुरवैरिणो रतिपतेर्मातुस्त्रिलोकीजितः
स्कारत्पङ्कजकोटरोदरजुषो निद्राविरामे श्रियः।
प्रत्युद्बुद्धमरालपक्षपटहध्वानप्रबन्धानुगं
भृङ्गी मङ्गलगायिकेव ततं प्रोत्कूजति प्राङ्गणे [२] ॥

[पुनः परितोऽवलोक्य।] अहो रमणीयः शरदारम्भः। यतः।

मरो हरति मे चेतः प्रोन्मूर्च्छत्पङ्कजकुङ्मलम्। अपि च।

निष्कम्पा पृथिवी सशाद्वललता, निर्दुर्दिनं चाम्बरं
सुव्यक्तामलतारकेन्दु, सरितः काशप्रसूनाङ्किताः।
तोयं वीतविषं,[३] सरांसि विकसत्पद्मानि, शुभ्रा दिशो,
दृष्टं सम्प्रति शारदीं श्रियमिमां मन्ये प्रबुद्धो हरिः ॥

---

[१] सूत्रधारो वदतीति शेषः एवं सर्वत्र।

[२] सुरवैरिणो हरेर्दाराणां वनितायाः त्रिलोकीजितोरतिपतेर्मातुर्जनन्याः। स्कारतां प्रकाशमानतामुपगच्छतां पङ्कजानां कोटरमिवोदरं मध्यं तज्जुषः सेवमानायाः श्रियः प्राङ्गणे निद्राविरामे निमित्तार्थे सप्तमी तदर्थमित्यर्थः। मरालो हंसस्तस्य पक्ष एव पटहः वाद्यभेदस्तस्य शब्दसमुदयानुगं यथा तथा भृङ्गी मङ्गलगायिकेव कूजति।

[३] वीतविषम् विगतकालुष्यम्।

[पार्श्वाभिमुखमवलोक्य] कण्व लिखितदृष्ट्या समायाति ?

[ततः प्रविश्य पुरुषो लिखितमर्पयति]

[सूत्रधारः विमृश्य वाचयति ।]

"अस्ति प्रशस्तिसहितः [१] श्रीमान् जयदेवः ।
अर्थिप्रत्यर्थिलक्ष्येष्वपराङ्मुखचेतसम् [२] ।
ये पराङ्मुखतां निन्युः केवलं परयोषितः ॥
यस्य चेतसि निर्व्याजं हृदयं तूलकणायते ॥
क्रोधे विरोधिनां सैन्यं प्रसादे कनकोच्चयः ॥
स च प्रसादेन रङ्गमण्डनं नाम नटं समादिशति ।
'इह शरदि विराजद्वारिजोत्तंसितायां
प्रथमविगतनिद्रः श्रीकराश्लिष्टवक्षाः ।
श्लथयति सुरारिर्योगमिदानुरागं
तदयमखिललोकस्योत्सवः किं पुनर्नः ? ॥
इदानीं भवता वीरसाङ्गतं रूपकम् अभिनीय गद
खास्मत्परिषदानन्दनीयेति ।" किं नाम तादृशं रू
[स्मृत्वा] आः ज्ञातम् ।

---

[१] प्रशस्तिः प्रशंसा ।

[२] अर्थिनः याचकाः कार्यनिवेदका वा प्रत्यर्थिनो वैरि
निवेदकप्रतिपक्षा वा तेषां लक्ष्येषु अपराङ्मुखचित्तमपीत्यर्थ

कुलं कविमुनेरस्ति पुत्रान् यत्र सरस्वती ।
संश्रित्यति धात्रीव नितान्तं मधुरां गिरम् ॥
तत्राभवदुपाध्यायो नारायणसमाह्वयः ।
जितवादिसहस्रौघः प्राप वादीश्वराभिधाम् ॥

अपि च । क्षतसंन्यसनात् [१] प्रयच्छतो-
ऽप्यभयं भूतगणाय योगिनः ।
निजमण्डलभेदशङ्किनो
भयमेकस्य रवेरभूद्यतः ॥

तत्सूनुः काञ्चनो नाम समस्तगुणवल्लभः ।
गोष्ठीशालेव [२] विद्वानां यस्य जिह्वा विराजते ॥

तेन कृतो धनञ्जयविजयो [३] नाम व्यायोगोऽभिनेतव्यः ।

[नेपथ्याभिमुखमवलोक्य ।] कः कोऽत्र भोः ?

---

[१] क्षतसंन्यसनात् क्षतसर्वविहितकर्मत्यागात्, भूतगणेषु अभयं प्रच्छतः ददतोऽपि यतः यस्मात् सकाशात् रवेः भयमभूत् । किं पलक्षयन् ? इत्यपेक्षायां विभिन्दन् निजमण्डलेत्यादि । योगिनो हि भित्त्वार्थमण्डलं ब्रह्मलोकं गच्छन्तीत्यागमप्रसिद्धम् ।

[२] गोष्ठीशाला सभागृहम् ।

[३] धनञ्जयस्य विजयमधिकृत्य कृतं इत्यर्थे तदधिकृत्य कृते ग्रन्थे इत्यण् तस्याख्यायिकायां वा लुक् तद्धितलुकि प्रकृतिलिङ्गत्व मिति बोध्यम् । व्यायोगो रूपकरूपनाटकभेदः ।

धनञ्जयविजयः।

[प्रविश्य पारिपार्श्विकः] भाव ! को णिओओ [१]।

[सूत्रधारः।] आकर्ण्यतां धनञ्जयविजयाभिनयकुशलो नट-वर्गः।

[पारिपार्श्विकः।] तथा। [इत्युक्त्वा निष्क्रान्तः।]

[सूत्रधारः। प्राचीमवलोक्य स्थित्वा]

चिरमज्ञातः समयवशात् कोऽपि तेजसो निचयः।
प्रकटीभवति विवस्वानेष किरीटीव समयमुत्तीर्णः [२]॥

[ततः प्रविशति विदूषकमात्रेण सहार्जुनः।]

[अर्जुनः। सोत्साहम्] अनुकूलं दैवं लक्ष्यते।

यतः। या लताभिष्यते सैव लग्ना सम्प्रति पादयोः।

कुरुराजोऽभियातव्यः स्वयमेव समागतः।

[सूत्रधारः। सहर्षमवलोक्य।] अये परिगृहीतार्जुनवेषः श्यामलकः प्रवृत्तस्तदहं पात्रान्तराणि प्रगुणयामि।

(इति निष्क्रान्तः प्रस्तावना)

---

[१] कोनियोगः इति सं० कथ्यतामिति शेषः।

[२] समयवशात् कालवशात् प्रतिज्ञावशाच्च चिरमज्ञातः अदृश्यः। समयं रात्रिकालं प्रतिज्ञातकालञ्च।

[नायकः। सहर्षम्।]

गोरक्षणं सकलशात्रवमानभङ्ग-
स्तोषो विराटनृपतेरुपकारिणश्च।
पर्य्याप्तमेकमपि [१] यत् समरोत्सवाय
सर्वं तथा मिलितमत्र ममैव भाग्यैः॥

अपि च। सा मनोरथसम्पत्तिः स एव हि महोत्सवः।
निर्वापयन्ति यद्वैरं परिपन्थिषु मानिनः॥

[अमात्यः।] देव! नेयं सेयामस्य भूमिः [२]।
निर्दग्धकालकेयस्य निवातकवचद्विषः [३]!
कौरवास्ते कियन्मात्रं रणाराधितशूलिनः॥

[नायकः।] साधु सुयोधन! साधु!
यत् पूर्व्वजैरधिगतं भुजविक्रमेण
तत् प्राप्य राज्यमखिलं कपटाक्षवृत्त्या [४]।
गाः साध्वतं हरसि भिल्ल इव त्वयाद्य
सापत्रपः कुलगुरुर्विहितो विधुर्नः॥

---

[१] एकमपि एतेषां गोरक्षणादीनामेकैकमपि पर्य्याप्तं समर्थम् अत्र विषये तत् तद्वृन्दमेव मिलितम्।

[२] नेयं तव योग्येति ग्रेषः।

[३] कालकेयनिवातकवचादयोऽसुरभेदाः।

[४] कूटद्यूतव्यवहारेण भिल्लः म्लेच्छभेदः।

[अमात्यः ।] देव! सुयोधनचरितेन शशिनोऽवनतं शिरः ।
चरित्राणि तवैवाद्य कुर्वन्तु परमोन्नतम् ।

[नायकः । विचिन्त्य,] कथमयं नगरसमीपे छिन्नसमरोपकरणानयनाय प्रहितः, प्रतिपन्नसारथ्यश्चिरयति कुमारः ?

[ततः प्रविशति विराटकुमारः ।]

[कुमारः ।] देव ! अनुष्ठितस्त्वादेशस्तदारोहत्वायुष्मान्

[नायकः । कृतसन्नाहो रथमारोहति]

[अमात्यः सविस्मयं नायकमवलोक्य ।]

विरचितसमरोचिताङ्गभूषः
परिहितभूषितवेष एष भाति ।
जलधरनिकरोपरोधशून्यो
रविरिव राजसुतः शरत्प्रचण्डः ॥

[पुनर्निपुणमवलोक्य ।]

हेषन्ते यच्छितजलधरध्वानमेते तुरङ्गा
भूमिं पादैर्यदपि च मुहुर्दक्षिणैरालिखन्ति ।
यान्तोत्सुक्यं यदपि चलनाद्बालधेर्यञ्चयन्ति
[illegible]र्दण्डहितयवशगा तत् समग्रा जयश्रीः ॥

[नायकः ।] अमात्य ! वयमिदानीं गाः प्रत्यानेतुं प्रस्थिताः
[illegible] गोहरणोद्विग्नं पौरजनं समाश्वासय ।

[अमात्यः ।] यदादिशति देवस्तथा करोमि [इति निष्क्रान्तः]

[नायकः । कुमारं प्रति ।] यावन्मा गमन् दूरे गावस्तावन्नोदयाश्वान् ।

[कुमारस्तथा करोति]

[नायकः । रथवेगं निरूप्य]

आलिङ्गन्तो वसुधां निजखुरदलितामिवानुनेतुममी ।
वदनविगतचरणा इव संलक्ष्यन्ते जवादश्वाः ॥

अपि च ।

विच्छिन्ना रथचक्रपङ्क्तिरियं हेलासुतैर्वाजिना—
मायान्तीव जवेन सम्मुखममी मार्गस्थिताः शाखिनः ।
खेदं पादतलाहतेरिव पुरो गन्तुं गतो नेहते [१]
वाहानामनुकूलमारुतभरोद्भूतोऽपि धूलिव्रजः ॥

[नेपथ्याभिमुखदवलोक्य ।] रेरे गोपाला ! अलं विषादेन ।

तथाहि ।

सिञ्चन्तः करुणारसेन हृदयं यावन्न वत्सा अमी
मातुर्मार्गविलोकनव्यसनिनो मुञ्चन्ति हम्बारवान् ।
याचन्ते नहि यावदेव शिशवः पातुं पयो नोत्सुका-
स्तावद्गाव इहेत्यवेत भवतां चेतोज्वरः शाम्यतु ॥

[१] पादतलाघातादिव खेदं गतः सन् पुरो गन्तुं नेहते इत्यन्वयः ।

[नेपथ्ये महाप्पसाद्यो [१]।]

[कुमारः।] आयुष्मन्नूनमदूरे कुरुबलम्। यतः।

वाजिव्राजखुराभिघातदलितक्षौणीरजोभिः पुरः
सान्द्रैर्जीर्णकपोतकण्ठरुचिभिर्व्योमेदमास्तीर्यते।
किं वाक्येन करीन्द्रगण्डविगलद्दानाम्बुधारागणा-
भोगं संप्रथयन्त्यमी परिमलप्रोद्गारिमन्दानिलाः॥

[नायकः।] सुव्यक्तं कुरुबलम्।

तथाहि। व्याधूतचामरसुदस्तसितातपत्र-
मुत्क्षिप्तकुन्तभयविद्रुतपक्षिचक्रम् [२]।
एतद्बलं कुरुपतेर्भरपूर्यमाण-
शङ्खध्वनिव्यतिकरान्मृगं पुरस्तात्॥

[बाह्वं प्रति सोत्साहम्।]

कान्तारक्षितिषूपधानविषये [३] यद्धूलिभिर्धूसरौ
पाञ्चालीपरिरम्भनिर्भररसास्वादेऽपि यद्वञ्चितौ।
यत् कान्ताजनयोग्यदन्तवलयैरावेष्टितौ निस्त्रपं
तद् बाह्व! स्मरतं चिराय पुरतस्तिष्ठन्त्यमी वैरिणः॥

---

[१] मह[illegible]प्रसादः। स०।

[२] प[illegible]चक्रं पक्षिसमूहः भरेण वेगेन पूर्यमाणः।

[३] क्ष[illegible]यानं शिरोवस्त्रापनोचितपदार्थविन्यासः (बालिप्र०।

[नेपथ्ये।]

धृतधनुरिव दर्पः साहसस्येव मूर्त्तिः
स पटुरिव [१] रसोऽयं विग्रही वीरनामा।
दधदिव जयलक्ष्मीं सन्निधौ चापवल्ली—
मगणितकुरुराजः कोऽयमेकोऽभ्युपैति ? ॥

[उभौ शृण्वतः।]

[कुमारः।] आयुष्मन्! कस्येदमुदारं वचनम् ?

[नायकः।] अस्मत्प्रथमगुरोः शारद्वतस्य।

[पुनर्नेपथ्ये।]

द्वन्द्वाहवाराधितशूलपाणिः
स पाण्डवः खाण्डव[२]तर्पिताग्निः।
व्याघातजातः किणसन्निवेशः
करद्वये यस्य परस्य पुंसः ॥

अपिच। गलितनिखिलशस्त्रं बाहुमात्रावशेषं
द्विगुणिततररागं यं निरीक्ष्य स्मरारिः।

---

[१] विग्रही मूर्त्तिमानिव यतश्च पटुः कार्य्यसमर्थः।

[२] खाण्डवनामवनदाहेन सन्तोषित वह्निः। तदुत्कीर्त्तनेन चास्य सेन्द्रदेवतादिजयकर्त्तृत्वं सूच्यते।

विहितकपटरूपः साहसाक्षिप्तचेता [१]
नयनमभिललाटं दर्शयामास सद्यः ॥

व्यक्त एवायमर्जुनः। तथाहि

हेलोल्लङ्घितवारिधिर्जनकजाविश्लेषमुच्यन्मनः—
कौशल्यासुतदैन्यपानसुपटुर्यस्यांशुमन्मण्डलः [२]।
निर्दग्धाखिलराक्षसेश्वरपुरः सौमित्रिसंजीवन—
प्रोत्खातौषधिपर्वतोऽस्य मरुतः पुत्रो ध्वजो वर्त्तते ॥

[उभौ परिक्रामतः।]

[कुमारः।] आयुष्मन्!

क्षतवीररसोद्रेकैः वैदर्भीगर्भितैः पदैः।
त्वयि पुत्र इवात्यर्थं पक्षपातं व्यनक्ति कः?

[नायकः।] कुमार! किमित्युच्यते पुत्र इवेति ननु पुत्र एवाहमाचार्यस्य।

[नेपथ्ये।]

द्रुर्ण कर्ण! धनुर्गृह्यण समरे प्रारब्धतत्परयणी-
भारद्वाज! भृगूद्वहादधिगतान्यस्त्राणि संप्रिच्य [३]।

[१] मायया कृतकिरातवेषः साहसमुत्साहस्तेन हृतचित्तः।

[२] जातमात्र एव हनूमान् सूर्यबिम्बं बिम्बफलं मत्वा ग्रसितुमुपचक्रामेति पुराणप्रसिद्धम्।

[३] संप्रिच्य अनुशीलय स्मरेत्यर्थात्।

द्रौणे! नन्दय कौरवक्षितिपतिं पुत्रस्तथा शान्तनोः
संधत्ते समरोचितं पुररिपोः शिष्योऽयमास्तेऽग्रतः॥

[नायकः। सानन्दम्] सोऽयं कुरुराजः सेनायां सन्नाहयति[१] योधान्।

[कुमारः।] देव! सारथिना परबलयोधाः स्वरूपतो वीर्यतश्च ज्ञातव्याः।

[नायकः।] पश्यैनं भुजग[२]ध्वजावेदितकौटिल्यम्।
यस्येन्दुवंशकलहप्रथमाङ्कुरस्य
सौजन्यगन्धमपि यस्य न वेत्ति चेतः॥
आ जन्मनो विषजलाग्निमुखैरुपायै-
रस्मन्निकार[३]निरतः कुरुराज एषः॥

[कुमारः।] कोऽयं ततो दक्षिणतः?।

---

[१] सन्नाहयति युद्धार्थमुद्योजयति।

[२] भुजगाकारोध्वजस्तेनैवावेदितं कौटिल्यं यस्य।

[३] इन्दुवंशश्चन्द्रवंशस्तत्यन्तपापामित्यर्थः कलहस्य परस्परं विरोधस्य प्रथमाङ्कुरस्य आद्यबीजप्ररोहस्वरूपस्य यस्य दुर्योधनस्य चेतः सौजन्यगन्धम् सुजनतालेशमपि न वेत्ति। अस्माकं निकारः दुःखोत्पादनम् तत्र निरतः आसक्तः।

[नायकः । साश्चर्यम् ।]

रोषोत्कर्षकषायितोल्बणदृशोऽप्यग्रे हिडिम्बद्विषः
पाञ्चालीहृदयस्खलात् सरभसं लज्जादुकूलाञ्चलः ।
निर्मोकः फणिनस्तनोरिव बलाद्येनावकृष्टः पुरा
सोऽयं साहसिकाग्रणीस्तनुरथे दुश्शासनस्तिष्ठति [१]॥

[कुमारः ।] किमतः परं साहसम् ? ।

[नायकः ।] इतः पश्य । [सप्रणामम्]

प्रतिफलितरविप्रभावितानः
स्फुरदुरुकाञ्चनवेदिसूचितेज्यः [२] ।
दधदुपनिषदः श्रियं समग्रां
प्रथितयशा गुरुरेष कौरवाणाम् ॥

[कुमारः ।] महानुभावः खल्वेष लक्ष्यते ।

---

[१] रोषोत्कर्षेण क्रोधातिशयेन कषायिते रक्ते उल्बणे उत्कटे दृशौ नेत्रे यस्य हिडिम्बद्विषः हिडिम्बराक्षसहन्तुरपि भीमस्याग्रे सरभसं सबलात्कारम् । तनुरथे स्वल्पप्रमाणरथे तिष्ठति ।

[२] स्फुरन्त्या दीप्तया उर्व्या महत्या काञ्चनवेद्या सूचिता इज्या सम्माननं यस्य । प्रतिफलिता काञ्चनवेद्यां प्रतिबिम्बिता या रविप्रभा सैव वितानमुल्लोचमिव यस्य तादृशम् । उपनिषदः अस्त्रविद्यारहस्यस्य श्रियं दधत् धारयन् । एषः कौरवाणां गुरुः शिक्षयिता द्रोणाचार्यः ।

[नायकः।] इतः पश्य।

योऽयं ललाटतटमण्डितचण्डचूड़ः
संलक्ष्यते स्वयमिव त्रिपुरप्रमाथी [१]।
मूर्त्तोऽस्त्रवेद इव दुर्विषहः परेषां
पुत्रो गुरोः पुनरयं दयितः सखा मे॥

[कुमारः।] पुनरावेदय।

[नायकः।]

येनोर्ध्वं जमिषतः कलस इवारोपितो धनुर्वेदः।
कनककमण्डलुमण्डितरथवंशो भाति गुरुरेषः [२]।

[कुमारः।] कोऽयं कुरुराजसन्निधौ समरार्थीव दृश्यते?।

[नायकः सामर्षम्।]

मूलं सुयोधनकृताखिलदुर्नयानां
यद्दोर्बलं, भृगुकुलोद्वहगूढ़शिष्यः।

---

[१] चण्डा उग्रा चूड़ा शिरस्यजटाभेदः। स्वयं त्रिपुरप्रमाथी शिव इव दुर्विषहः सोढुमशक्यः अनिवार्य इत्यर्थः गुरोः द्रोणस्य पुत्रः अश्वत्थामा।

[२] एष कृपाचार्यः तस्य कनकमण्डलुयुक्तध्वजत्वं भारते प्रसिद्धम्।

सोऽयं प्रसन्नबलसूदनदत्तशक्तिः
सुतात्मजो निजकुलानुचिताभिमानः [१] ॥

[कुमारः । सोपहासम्] नन्वेष घोषयात्रायां विदितप्रभावः [२] । क एष ध्वजः ।

[नायकः । सप्रणामम् ।]

अन्याङ्गनापरिहृतिप्रणयेन कीर्त्ते-
र्वाल्लिङ्गितो धवलया पलितच्छलेन ।
द्वन्द्वाहवप्रकटनिर्जितजामदग्न्यो
देवव्रतः पृथुयशाः स पितामहो नः [३] ॥

---

[१] भृगुकुलोद्वहस्य जामदग्न्यस्य गूढ़शिष्यः आत्मनः क्षत्रियत्व-मपह्नुवानेन ब्राह्मणत्वं प्रख्याप्य ततोऽस्त्रविद्या कर्णेनासादितेति भारतप्रसिद्धम् । प्रसन्नेन स्वदेहोत्कर्त्तनेनापि सहजकवचकुण्डलस्य दानेन परितुष्टेन बलसूदनेन इन्द्रेण दत्ता शक्तिः एकपुरुषघातिनी अस्त्रविशेषो यस्मै । तत्कथा च वनपर्वणि ३०९ अध्याये ।

[२] सुतपुत्रं जिघांसन्तः समन्तात् पर्य्यवाकिरन् ।
अन्योऽस्य युगमच्छिन्दन् ध्वजमन्ये न्यपातयन् ॥
इत्युपक्रम्य । ततो रथादवप्लुत्य सुतपुत्रोऽसिचर्ममृत् ।
विकर्णरथमास्थाय मोक्षायास्याननोदयत् । म, भा, व, घो

[३] अन्यस्या अङ्गनायाः स्त्रियाः परिहारेण यावज्जीवं तस्य ब्रह्मचारित्वात् यः प्रणयः सापत्नभावेन प्रेमाधिक्यं तेनैव हेतुना,

सूत! त्वरय त्वरय तुरगान्।

नेपथ्ये।

वैमानिका दमे व्योम्नि समरालोकनोत्सुकाः॥
बाहुसारमिदानीं त्वं प्रदर्शय धनञ्जय!॥

ततः प्रविशति विद्याधरसहित इन्द्रः प्रतीहारी च।

[इन्द्रः। साश्चर्यम्।]

वाक्कलहोऽपि गहनो बहुभिर्बलिनो विहीनसामर्थ्यैः॥
किमुतानेकैर्बलिभिः क्रूरास्त्रनिपातदारुणः समरः॥

पुनः सविस्मयम्।

एको रथी प्रतिरथास्तु निरस्तसंख्याः
कर्णादयः सुचिरराज्यमदेन दृप्ताः।
वत्सस्तथाप्यहह निग्रहणं[१] प्रविष्टः
सत्त्वं हि नोर्जिततरं विदुशत्यपायम्॥

कुमारः। [पुरोऽवलोक्य] देव! कुरुपतिरेवागच्छति।

धवलया शुभ्रया कीर्त्येव पलितच्छलेन जरसा केशादि श्वेतप्रव्याजेन आलिङ्गितम्। द्वन्द्वाहवे द्वैरथे युद्धे प्रकटं सप्रकाशं निर्जितः जामदग्न्यो येन। तत्कथा च उद्योगपर्वणि अम्बोपाख्याने १८५ अध्याये।

[१] प्रतिकूलो रथो येषां प्रतियोद्धारः। निग्रहणं युद्धम्।

नायकः। पूर्णास्तर्हि मनोरथाः।

[ततः प्रविशति रथारूढो दुर्योधनः]

दुर्योधनः। [नायकं विलोक्य सामर्षम्]

वनवासपरिक्लेशात् किं निर्विण्णोऽसि [१] जीवने।
यद्भीरेक एव त्वमनेकैर्योद्धुमुद्यतः॥

नायकः। [सोपहासम्]

एको निवातकवचान् सह कालकेयै-
र्भस्मीचकार, भगिनीमहरच्च शौरेः।
एकेन खाण्डववनं जुहवेऽनले च
पार्थस्य नाभिनव एष रणेषु पन्थाः [२]॥

दुर्योधनः। अलमेतैरुपहासैः। उपस्थितो निकषोपलोपमः संग्रामः।

नायकः। [सहासम्]

अपसर कुरुनाथ! द्यूतमन्यादृशं तद्-
द्रुपदनृपतिपुत्री यत्र दासीकृतासीत्।

---

[१] जीवने निर्विण्णः वैराग्यं प्राप्तः।

[२] अहमित्यनुक्त्वा पार्थत्वेनात्मनामकीर्त्तनं गर्वसूचनार्थम्। निवातकवचकालकेयादैत्यभेदाः, तद्युद्धकथा च भारते वनपर्वणि १७२ अध्याये। शौरेः कृष्णस्य भगिनीम् सुभद्राम्।

दृह हि शरशलाकापातपूर्वं [१] सगर्वं
प्रतिनृपतिशरास्त्रैः क्षत्रियद्यूतकेलिः ॥

दुर्य्योधनः। [सामर्षम्]

करिवदनवलयभूषितकरश्चिरत्यक्तकार्मुकाभ्यासः।
नर्त्तनशालां प्रविश प्रवीरपुरुषोचितो हि संग्रामः ॥

कुमारः। [सोल्लुण्ठम्] आर्य्येनं चिरपरित्यक्तकार्मुकाभ्यास इत्यभिधत्से तद्युक्तम्।

संक्रन्दनप्रहितखेचरवर्गबद्ध-[२]
युष्मत्कृपाकुलनिजाग्रजशासनेन।
भीमानुजेन विहिता शरपञ्जरश्री-[३]
र्नालोकिता हि भवता नृप! विक्लवेन ॥

---

[१] शरा एव शलाका द्यूतसाधनवस्तुभेदास्तेषां पातपूर्वं क्षत्रियाणां द्यूतरूपः केलिः। प्रतिनृपतिशरास्त्रैः विरोधिनृपबाणरूपपाशकैः। अतएव तस्मादन्यादृशत्वमस्य द्यूतस्यातोऽपसरेत्यर्थः।

[२] प्रियदर्शी महाबाहो धार्त्तराष्ट्रो महाबलः।
गन्धर्वैर्ह्रियते राजा पार्थ! त्वमनुधावत ॥
दुःशासनो दुर्विषहो दुर्मुखो दुर्जयस्तथा।
बद्धा ह्रियन्ते गन्धर्वैराजदाराश्च सर्वशः।
इति महाभारते वनपर्वघोषयात्रापर्वणि।

[३] स तानुत्पतितान् दृष्ट्वा कुन्तीपुत्रो धनञ्जयः।

विद्याधरः। देव! प्रौढः खलेषु वत्सः।

इन्द्रः। राजपुत्रो ह्ययम्।

दुर्योधनः। सूत! अलं विप्रजनोचितवाङ्मलहेन विषमेयं भूमिः, रथसञ्चारोचितां भवमवतराम।

नायकः। यदभिरुचितं कुरुपतये।

(इति निष्क्रान्तौ)

विद्याधरः। [नायकरूपं निर्दिश्य] देव!

त्वन्नन्दनस्यन्दनवाजिराजिचुरत्तचुम्बरजःपताकाः।
विपत्तवत्तोऽरणिमन्थनोत्थप्रतापवह्नेरिव धूमलेखाः [१]॥

इन्द्रः। भद्र! महाकविरसि।

विद्याधरः। देव! निकटगते किरीटिनि प्रवृत्तः कोलाहलः कुरूणाम्। तथाहि

महता शरजालेन समन्तात् पर्य्यवारयत्।
ते वद्धाः शरजालेन शकुन्ता इव पञ्जरे।
इति महाभारते वनपर्वघोषयात्रापर्वणि।

[१] विपत्तस्य शत्रोः वत्त एवारणिः अग्निमन्थसाधनकाष्ठभेदः तस्य मन्थनेन घर्षणेन उत्थस्य उत्थितस्य प्रतापवह्नेः धूमलेखाः धूपश्रेण्य इव रजः पताका लक्ष्यन्ते इति श्लेषः।

हेषाघोषैर्हरीणां जितघननिनदैर्दृंहितैः कुञ्जराणां
ज्याघातोत्थैर्निनादैः पटुपटहरवैर्मर्दलोद्दामशब्दैः ।
प्राप्तैः कर्णोपकण्ठं मदगजनिवहस्कन्धघण्टाप्रणादैः
श्रृङ्गाराय [१] त्वरन्ते त्रिदशभृगदृशो वीरवर्गानुरक्ताः ॥

प्रती । देव ! ण कोलाहलमेत्तं जण्णं बि पउत्तं, कुरुबलं पच्चहिआतस्स तुह उत्तस्स अहिमुहं पचलिदम् । देव ! पेक्ख आकण्णाकट्टिअकठिणफग्गुणकोदण्डमुहणिस्सरन्तसरणिअरेहिं केवि खण्डिदगत्ताओ, केवि भग्गकोदण्डाओ, केवि पमुड़िदमीसकाओ, केवि णिभिण्णणेत्ताओ, केवि भग्गभुजाओ, केवि बिक्खदबक्खत्थलाओ, कुरुबले भटा दीसन्ति [८] ।

इन्द्रः । [सहर्षम्] कृतहस्तः खल्वेष वत्सः ।

---

[१] कर्णोपकण्ठं श्रवणान्तिकं श्रृङ्गाराय नेपथ्यकरणाय ।

देव ! न कोलाहलमात्रं जन्यमपि (युद्धमपि) प्रवृत्तं, कुरुबलं प्रत्यभियातस्य तव पुत्रस्य अभिमुखं प्रचलितम् । देव ! प्रेक्षस्व । आकर्णाकृष्ट-कठिन-फाल्गुन-कोदण्डमुखनिःसरच्छरनिकरैः केऽपि खण्डितगात्राः, केऽपि भग्नकोदण्डाः, केऽपि प्रमोटितग्रीवकाः, केऽपि निर्भिन्ननेत्राः, केऽपि भग्नभुजाः, केऽपि विच्छतवक्षःस्थलाः कुरुबले भटा दृश्यन्ते स० ।

विद्याधरः। देव! पश्य पश्य।

मुच्चद्भिर्मदवारि वारणगणैर्मेघायितं, कार्मुकै-
रेतैः शक्रशरासनायित, मधश्चक्रैः शिलीन्ध्रायितम्।
खद्योतायितमस्त्रघट्टनसमुद्भूतस्फुलिङ्गैः, स्फुरन्-
नाराचैरशनायितं, रणभुवा सैन्यैर्नभस्यायितम् [१]॥

अपि च। त्वत्चमुक्तविशिखैरशनिप्रकाशै
रामूललूननवकेतककान्तदन्ताः।
त्रासावसन्नमदधारकपोलभागाः
सम्पादयन्ति करिणः करिणीभ्रमं नः [२]॥

इन्द्रः। [सतोषम्]

हरान्तेवासिनस्तस्य कालकेयान्तकस्य च।
यदुनाथमनाथस्य का श्लाघा कौरवैर्जितैः।

---

[१] मेघैरिवाचरितं सर्वत्र कर्तुरुपमानात् क्यचि भावे क्तः। नभस्यः भाद्रपदमासः।

[२] केतक्याः पुष्पं केतकं तदिव कान्ता शुभत्वात् दन्ता येषाम् त्रासेनावसन्ना विलुप्ता मदधारा दानजलसन्ततिर्यत्र तादृशः कपोलभागो येषामतएव दन्तमदयोः साहित्यात् करिणीभ्रान्तिः।

प्रतीहारी। पेक्खदु देवो।

बाणप्पलूणमअवारणगेरगेर
णाणामिराहिमुहदत्तगहीरतुण्डा।
एसा पयाचिदकराङ्गुलि कण्ठदिग्धं
रक्तासवं पिबइ काबि पिसाअकण्णा [१]॥

विद्याधरः। देव! पश्य।

एते मत्तमतङ्गजाः प्रजविनः श्वासाकुलाघोरणाः
स्फूर्जच्चन्द्रकिवर्हभारकलितोद्दण्डध्वजश्रेणयः॥
कुप्यत्चत्करवज्रपातचकितप्रभ्रान्तपृथ्वीधर-
व्यूहभ्रान्तिमुदद्वयन्ति नितरां त्वत्पुत्रविद्राविताः [२]॥

---

[१] बाणप्रलून मदवारण ग्रन्थि ग्रन्थि
नानाग्निराभिमुखदत्त गभीरतुण्डा।
एषा प्रणर्त्तितकराङ्गुलि, कण्ठदिग्धम्
रक्तासवं पिबति कापि पिशाचकन्या स०॥

मदप्रधानोवारणाः मदहस्ती ग्रन्थिग्रन्थौ प्रतिसन्धिस्थानम्। तुण्डमाननम् प्रणर्त्तिताः कराङ्गुलयो यत्र तद्यथा तथा, कण्ठदिग्धं लिप्तकण्ठं रक्तं रुधिरमासवमिव तत् पिबति।

[२] श्वासाकुला गजानां प्रजवित्वात् श्वासव्यग्रा आघोरणाः हस्तिपका येषां चन्द्रकी मयूरस्तस्य वर्हः पुच्छस्यचन्द्रकं तद्वारेण कलिता

इन्द्रः। [सहर्षं पश्यति]

प्रतीहारी। देव! पेक्ख पेक्ख! णिरन्तरविक्खित्तबाणणिउरम्बपरिक्खदगअणरुहिरपाणसंतप्पिदाओ साहुवादोत्तरं जादुहाणजोइणीओ अहिणन्दन्ति तुह उत्तस्स विअअं [१]।

इन्द्रः। जय एव तर्हि, सत्याशिषस्ताः।

विद्याधरः। [विभाव्य] देव! महद्युद्धं वर्त्तते। पश्य पश्य।

वपुषि भटकरोटिन्यस्तकीलालसिन्धुं
द्विरदकरमृणालैर्योगिनीभिर्निपीय।
समरविजयिने यद्बाहुसुद्यम्य भूयः
प्रकटितपरितोषं स्वस्तिवादोऽभिनेने [२]॥

युक्ता उद्दण्डा दीर्घवंशदण्डा ध्वजश्रेणयः येषाम्। उदञ्चयन्ति उत्थापयन्ति जनयन्तीत्यर्थः।

[१] देव! प्रेक्षस्व प्रेक्षस्व निरन्तरविक्षिप्तबाणनिकुरम्बपरिक्षतगजनरुधिरपानसंतर्पिताः साधुवादोत्तरं यातुधानयोगिन्यः अभिनन्दन्ति तव पुत्रस्य विजयम्। स०। यातुधानाराक्षसास्तत् सहिता योगिन्यः देवीगणभेदाः।

[२] भटानां करोटिः मस्तकास्थिभेदः। तत्र न्यस्तं कीलालं रुधिरं सिन्धुं बाहुल्यात् नदीं समुद्रमिव वा द्विरदानां करा मृणालानि शुभ्रवर्त्तात् तैः निपीय। स्वस्तिवादः आशीर्वादवाक्यम्।

अपिच। भुग्नभ्रूयुगलैः क्रुधा समधिकस्फारारुणाक्षैः क्षणात्
स्वेदाम्भःपटलप्रमृष्टतिलकैर्दष्टाधरोष्ठैरपि।
दृष्टश्मश्रुभिरुत्पतद्भिरभितः संकीर्णमालक्ष्यते
त्वत्पुत्रास्त्रनिकृत्तवैरिसुभटश्रेणीशिरोभिर्वियत्॥

[पुनः सविस्मयमालोक्य] देव! पश्य।

कोऽप्येष खण्डितशिरा विकसन्मुखश्रीः
प्रारब्धताण्डवविधिः सुरकामिनीभिः।
आलोक्यते निजकराभिनयानुरूप-
व्यापारितेक्षणनिवेदितसत्त्वसारः [१]॥

इन्द्रः। [सहर्षम्] किं किं पश्यामि दोलायितं मनः।

मायाविभिः कुरुबलैः सह युध्यमानं
कुन्तीसुतं रणशिरस्यमहायवीरम्॥
तद्वैरिवीरवरणेषु तथात्र नूनं
सापत्नसम्भ्रमकलिं सुरकामिनीनाम् [२]॥

विद्याधरः। एवमेतत्। [अन्यतोऽवलोक्य] देव! पश्य पश्य

---

[१] सत्त्वसारः बलाधिक्यम्।

[२] सपत्नजा भावस्तत्र सम्भ्रमेण अहमेवास्य उपभोग्या भवेयं नान्येति जातसम्भ्रमेण यः कलिः कलहः तच्च। एतयोर्मध्ये किं किं पश्यामीति गद्यस्थेन किं पदेन प्रश्नितं कर्मविशेषितम्।

दूरात् प्रोत्साय्यमाणापरशरनिकरज्वालकीलाभिघात-
प्रभ्रश्यद्वाजिवर्गभ्रमणनियमनव्याकुलब्रध्नसूतः।
लेढ़ि पौढ़ो ऊताग्निः क्षतलयसमयाशङ्कमाकाशवीथिं
गङ्गासूनुप्रसूक्तप्रथितऊतवहास्त्रानुभावप्रसूतः [१]॥

प्रतीहारी। देव! अच्छारणं बि णिअडवत्ती भआणओ एसो ऊदासणो।

विद्याधरः। भद्रे! मा भैषीः किं नामेदं किरीटिनः। पश्य पश्य।

नीलैः कालाञ्जननिभतमःस्तोमलिप्तान्तरिक्षै-
र्विद्युद्दामद्युतिधवलिताशेषदिक्चक्रवालैः॥
धीरध्वानैः कलभकनिभैः स्थूलधाराः सृजद्भि—
र्मेघैर्नीतः प्रलयमनलो वारुणास्त्रप्रसूतैः॥

इन्द्रः। महानुभावः खल्वेष वत्सः।

[प्रतीहारी।] देव सम्मदं राहासुदेण भुजङ्गमत्थं पउत्तं आलोलजीहजुअलकरालमुहणीसरन्तगरलधूमलेहाकरम्बिद-फणारअणकिरणमालाबिड़म्बिदसुरकोअण्डाओ बिहलि-

---

[१] प्रौढः उद्दीप्तः। गङ्गासूनुर्भीष्मः ऊतवहास्त्रम् आग्नेयास्त्रं तस्यानुभावः प्रभावस्तेन प्रसूतः जातः ऊताग्निः वह्निः आकाशवीथिं गगनपथम् लेढ़ि ज्वालया स्पृशति।

दसअलपुहवीवलआओ पेक्खणमेत्तदग्घमहामहीरुहाओ अपसरन्ति सप्पाओ। [१]

विद्याधरः।

दीर्घैः सज्जनशस्त्रवन्मुकुलितैश्चित्तैः खलानामिव
व्यालैर्योगिजनैरिवाम्बरतलव्याप्तैर्नमत्स्वस्तिकैः।
रत्नोद्भासिकरोज्ज्वलैर्नृपतिवत्स्वर्गस्थवद्भोगिभिः
राधेयास्तभुजङ्गमास्त्रजनितैर्दिक्चक्रमाक्रम्यते [२]।

इन्द्रः। खाण्डवदाहे कृतवैराः किं दशन्ति सर्पाः॥

विद्याधरः। अलं विषादेन अर्ज्जुनेन प्रयुक्तं गारुड़मस्त्रम्। पश्य पश्य।

पदाघातनिपातभारतभरात् प्रोत्क्षिप्तपृथ्वीधरा-
श्चञ्चूदष्टविशालभोगभुजगाः सूर्य्योपकण्ठस्पृशः।

---

[१] देव! साम्प्रतं राधासुतेन भुजङ्गमास्त्रं प्रयुक्तम्, आलोलजिह्वायुगलकरालमुखनिःसरद्धूम्रलेखा करम्बितफणारत्नकिरणमालाविडम्बितसुरकोदण्डाः विक्षलितसकलपृथिवीवलयाः प्रेक्षणमात्रदग्धमहामहीरुहाः अपसरन्ति सर्पाः। स०

[२] स्वस्तिकमासनभेदः कुण्डस्याकारश्च मण्डलाधिष्ठानञ्च। अम्बरतलं व्याप्तं यैः निष्ठास्तस्य परनिपातः। योगिजनैर्योगसिद्धा लाघवप्राप्याम्बरगमनं योगशास्त्रप्रसिद्धम्। सर्पदेहः सुखादिभोगश्च भोगः तद्वद्भिः।

सन्तोषं जनयन्त्यमी कुलगुरोस्तीक्ष्णास्तथा सारथे—
र्मन्ये वैरिनृपप्रमाथविकसद्विक्रान्तयः पक्षिणः [१] ॥

इन्द्रः। [सहर्षम्] ततस्ततः।

प्रतीहारी। एसो सम्मदं दुज्जोधणभक्खिदेण दोणेण मुत्तो वारणवाणो तुह उत्तस्स समुपचलिदो [२]।

विद्याधरः। [सम्यगवलोक्य] प्रयुक्तं वैनायकमस्त्रम्। पश्य पश्य।

सिन्दूरारुणमौलिभिः खदशनप्रोताम्बुदश्रेणिभि—
र्लीलोदस्तकरायमारुतभरप्रोद्भूततारागणैः।
पादाघातचलत्कुलक्षितिधरैः संकीर्णमालक्ष्यते
हैरम्बास्त्रविनिःसृतैर्मदमुखैः स्तब्धैरमैरम्बरम् [३] ॥

इन्द्रः। ततस्ततः

विद्याधरः। पार्श्वेन सिंहास्त्रं प्रयुक्तम्। पश्य पश्य।

---

[१] सूर्य्योपकण्ठसदृशः अत्यन्तोर्द्धगताः। कुलगुरोः द्रोणस्य सारथेः उत्तरस्य च सन्तोषं जनयन्ति।

[२] एष साम्प्रतं दुर्य्योधनभक्षितेन द्रोणेन मुक्तो वारणबाणः तव पुत्रस्य समुपचलितः। स०

[३] लीलया उदस्तस्य उत्क्षिप्तस्य करायस्य मारुतभरेण पवनातिशयेन प्रोद्भूताः प्रोत्क्षिप्ताः स्थानात्चालितास्तारागणाः यैः। कुलक्षितिधराः कुलपर्वताः। हैरम्बो देवतास्य हैरम्बम् गाणपत्यम्।

दंष्ट्राज्योतिःखचितगगनैः केसराटोपभीमैः
रुल्लाङ्गूलैः [१] क्षितिधरगुहासञ्चरद्धीरनादैः।
सिंहैरन्तर्नखरशिखरात् खातकुम्भस्थलासृग्
धारास्वादव्यसनविवशैः क्वापि नीता गजेन्द्राः।

इन्द्रः। खल्वावशिष्टस्तर्हि जयः।

विद्याधरः। देव नैव, निरवशिष्टश्च।

हत्वा शान्तनुनन्दनस्य तुरगान् सूतं कुरूणां गुरोः
कर्णस्यापि रथं विदार्य्य करणः कृत्वा विसंज्ञं कपम्।
छित्त्वा द्रोणसुतस्य कार्म्मुकलतां विद्राव्य चान्यद्बलं
त्वत्पुत्रो भयविद्रवत् कुरुपतेः पन्थानमन्वेत्ययम्॥

प्रतीहारी। अज्जाहिदं दुज्जोधणः स [२]।

विद्याधरः। नैव

विमुखे निपतति शस्त्रं संक्रन्दननन्दनस्य न हि जातु।
मणिमयमुकुटनिपातात् कोपाग्निस्तस्य कोपितः किञ्चित्॥

[नेपथ्ये]

भो भो राधेयमित्र!

---

[१] उल्लाङ्गूलैः उत्क्षिप्तलाङ्गूलैः धीरनादैः गभीरशब्दैः।
[२] अत्याहितं दुर्योधनस्य। सं०

राजात्मजापरिभवक्षुभितः [१] प्रतिज्ञा-
मार्य्यस्तवोरुदलने यदि नाकरिष्यत् ।
नूनं स्फुरन्मुकुटपाटनपाटवेन
तीक्ष्णैः शरैस्तव शिरोऽप्यहरिष्यदेव ॥

प्रतीहारी। देव सुदं तुह उत्तस्स बअणं [२]।

इन्द्रः। [सविस्मयम्]

दैवानुकूल्ये किं नाम न शिवाय प्रकल्पते ।
क्रुद्धभीमप्रतिज्ञापि ररक्ष कुरुभूपतिम् ॥

विद्याधरः। देव! दुर्य्योधनस्फुटपाटनक्षुभितैः कर्णपुरस्सरैः कुरुभिः समन्ततो वेष्टितोऽर्जुनः।

इन्द्रः। [सप्रश्रयम्] ततस्ततः।

विद्याधरः। देव त्वत्पुत्रेण प्रस्थापनास्त्रं प्रयुक्तम्।

आमीलितेक्षणयुगं प्रथमं प्रसर्पन्—
निश्वासवातभरपूरितकर्णघोषम् ।
गण्डस्थलानिहितकार्मुककोटि सुप्तं
संलक्ष्यते कुरुबलं मृतकल्पमेतत् ॥

---

[१] राजात्मजा द्रौपदी तस्याः परिभवेन सभायां केशाम्बरा कर्षणेन क्षुभितः संक्षोभितः। आर्य्यः ज्येष्ठ भीम इत्यर्थः।

[२] देव! श्रुतं तव पुत्रस्य वचनम्। स०

इन्द्रः। आयोधनश्रान्तानामुचितमेतत्। ततस्ततः।

विद्याधरः। एकं शान्तनवं हित्वा सर्व्वे विवसनाः कृताः।
प्रमृज्य लोचने पश्चात् प्रबुद्धास्त्र पलायिताः॥

अपि च। निर्जित्य कौरवबलान्यथ वल्लवेभ्यो
गास्ताः समर्प्य मुदितैरभिनन्दितस्त्वैः।
प्रत्युद्गतः पुरजनैरथ धूलिजाल—
व्यालोलसक्तनयनैरयमेति पार्थः॥

इन्द्रः। [आलोक्य] यद्द्रष्टव्यं तद्द्रष्टम्।

[ततः प्रविशति रथारूढो नायकः सूतश्च]

नायकः। सूतं विलोक्य कुमार!
न तथा मोदते चित्तं जित्वा कुरुपतिं रणे।
यथाऽक्षतशरीरेण त्वया मत्स्येन्द्रनन्दन!॥

सूतः। त्वयि रक्षितरि किं दुर्लभम्

इन्द्रः। [सरभसम्] दृष्टद्रष्टव्योऽस्म्यहम्।

[इति निष्क्रान्तः]

नायकः। [सतोषम्] सूत।
दुःशासनो यदकरोत् कुरुसन्निधाने
पञ्चालराजतनयां प्रसभन् विवस्त्राम्।

तत्साम्प्रतं प्रतिकृतं हरता मयात्र
निद्राणकौरवबलस्य रणेऽगुकानि ॥

सूतः। सर्वमेतत्प्रतिकृतम् तावच्च।

संग्राममरणं नाम चतदुःखं सुखोत्तरम्।
आजन्म हृदये शल्यं मानभङ्गो हि मानिनाम् ॥

नायकः। [पुरोऽवलोक्य] अये सोपकरणानुज आर्य्य, आर्य्यश्च विराट दूत एवागच्छति।

[ततः प्रविशन्ति यथानिर्दिष्टा युधिष्ठिरभीमनकुल
सहदेवाः सपरिवारो विराटश्च]

युधिष्ठिरः। मत्स्यराज! पश्य पश्य।

रथतुरगरजोभिर्धूसरश्मश्रुजालं
श्रमजलकणिकाभिर्भासुराभिः परीतम्।
अमसमरकर्म्माक्रान्तमप्यस्य वक्त्रं
जयति विजयलक्ष्मीसङ्गसम्पत्सुशोभम् ॥

विराटः। शोभन्ते विद्यया विप्राः, क्षत्रिया विजयश्रिया।
श्रियोऽनुकूलदानेन, लज्जया कुलपालिकाः [१]।

नायकः। [ससम्भ्रमम्] अये कथमार्य्यः [रथादवतीर्य्य यथोचितमभिवादयते]

---

[१] कुलपालिकाः कुलस्त्रियः।

सर्वे। [अभिनन्दन्ति]

एकोऽहरद्रिपुपुराणि हरः, खरादीन्
एकश्च दण्डकवने न्यबधीत् स रामः।
एकोऽधुना कुरुबलानि भवानजैषीत्—
नाश्रावि नैत्रि च पुनः पुरुषश्चतुर्थः [१]॥

नायकः। स खलु युष्माकं प्रसादः।

विराटः। [नेपथ्याभिमुखमवलोक्य] राजपुत्र पश्य पश्य।

वत्सालोकप्रस्नुतापीनभाजः[२]
भिन्दन्त्यः क्ष्मां क्षीरधाराच्छलेन।
चन्द्रालोकस्पर्द्धिनीं धेनवस्ते
कीर्त्तिं मूर्त्तां ननमेताः सृजन्ति॥

[अर्जुनं सम्बोध्य]

मध्येसभं यो द्रुपादात्मजाया-
श्चकर्ष केशान् धृतराष्ट्रपुत्रः।
निर्यात्यमेतन्मुकुटं निपात्य
निर्यातितं तस्य सुयोधनस्य॥

---

[१] यश्चैको बहूनि जितवान् तादृशश्चतुर्थः एतेषां प्रागुक्तानां त्रयाणां पूरणं न श्रुतः नापि दृष्ट इत्यर्थः।

[२] वत्सालोकनेन तद्दर्शनेन प्रस्नुतं यदापीनम् उधः तद्भाजः।

[तत् श्रुत्वा भीमः [सामर्षम्] भो भो राजन्नेतत् प्रतिश्रुतं भवति किन्तु

दुःशासनस्य गदया प्रविदार्य्य वक्षः
सद्यः कदुष्णरुधिराणि ततो निपीय।
तच्छोणिताक्तकुलिशां सुनियम्य देव्या
वेणीं तु तत् प्रतिकरिष्यति भीम एव॥

युधिष्ठिरः। वत्स किमसाध्यं त्वया।

लीलोन्मूलितकौरवैरमौगन्धिकवनश्रियः।
लीलाहतहिडिम्बस्य विक्रमं ते रुणद्धि कः॥

भीमः। श्रुत्वा सानुनयम्। गृहीतोत्वार्य्यः न क्षमेऽहम्।

युधिष्ठिरः। अतीतः कालः क्षमाया आसन्नश्च कालो विक्रमस्य। अलमनुनयेन।

विराटः। युधिष्ठिरं प्रति।

अज्ञानतोनियुक्तश्च यदयोग्येषु कर्म्मसु।
क्षन्तव्यं तन्नाहाभाग! नाज्ञातमपराध्यति॥

नायकः। राजन्नुपकार एवायं नापकारः।

यदि कर्म्म स्वयोग्येषु त्वमस्मान्न न्ययोक्ष्यथाः।
अज्ञातवासं राजायं नाकरिष्यत् सहानुजैः॥

विराटः । नायकं प्रति राजपुत्र !

सख्यं साप्तपदीनं यत् सोढव्यः प्रणयो मम ।
अतस्त्वामर्थये किञ्चिदुत्तरा मे क्षमास्तु ते ॥

नायकः । यद्रोचते भवते ।

स्वयमायान्तीं गेहे लक्ष्मीं को ना [१] विमन्यते मूढः ।
दैवानुकूलता सा यदयाचितमाप्यतेऽभीष्टम् ॥

विराटः । किन्ते भूयः प्रियमुपकरोमि ।

नायकः ।

निस्तीर्णोऽज्ञातवासोरणभुविविजिताधार्त्तराष्ट्राः सकर्णाः
स्त्रीरत्नं त्वत्तनूजा समजनि तनयस्याभिमन्योः कलत्रम् ।
गावः प्रत्याहृतास्ताः सुहृदपि परमस्वं च नः श्लाघनीयः
तज्ञाने नैव किञ्चित् सुचिरमवस्थन् यन्मया प्रार्थनीयम् ॥

तथापीदमस्तु ।

सौजन्यामृतसिन्धवः परहितप्रारम्भवीरव्रता
वाचालाः परवर्णने निजगुणालापे च मौनव्रताः ।
आपत्स्वप्यविलुप्तधैर्य्यनिचयाः सम्पत्स्वनुत्सेकिनो
मा भूवन् खलवक्त्रनिर्गतविषम्लानाननाः सज्जनाः [२] ॥

---

[१] ना पुमान् को मूढः विमन्यते अवजानाति ।

[२] सौजन्यरूपजलस्य सिन्धव इवाधाराः निजगुणालापे स्वगुण-

अपि च। सारस्वतं स्फुरतु चेतसि सत्कवीनां
चक्षुर्भवन्तु कृतिनो गतमत्सराश्च।
भूपाश्च सन्तु कविसूक्तिषु सानुरागाः
संत्यज्य मण्डलकविप्रणयानुरागम् [१]॥

विराटः। तथास्तु इति निष्क्रान्ताः सर्व॥

इति श्रीकाञ्चनाचार्यविरचितो धनञ्जयविजयोनाम
व्यायोगः समाप्तः।

कथने मौनव्रताः अवाग्व्यापाराः। परवर्णने वाचालाः वाग्मिनः। अनुत्सेकिनः अगर्वाः।

[१] मण्डलकविः ग्रामकाव्यरचयिता तस्य प्रणयः प्रणयनं तत्कृतिरित्यर्थः तत्रानुरागं संत्यज्य विहाय कवीनां सूक्तिषु दोषरहितकाव्येषु सानुरागाः सन्तु।

इति श्रीतातानाथ तर्कवाचस्पति विरचितम् धनञ्जयविजय
व्याख्यानम् समाप्तम्।

शुभमस्तु।

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018